रोल नं.

# 921-A

## कक्षा 9वीं त्रैमासिक परीक्षा, 2022-23

## संस्कृत–512

### (माध्यम हिन्दी)

(कुल प्रश्नों की संख्या : 23)
(समय : 03 घण्टे)

(कुल मुद्रित पृष्ठों की संख्या : 08)
(पूर्णांक : 75)

*निर्देशाः –*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*
*(ii) प्रश्नानां सम्मखे अङ्काः प्रदत्ताः।*

प्र 1 उचितं विकल्पं चित्वा लिखत –

(1×6=6)

(i) 'फल' शब्दस्य द्वितीया विभक्तेः एकवचनं भविष्यति –
(अ) फलस्य (ब) फलम्
(स) फलेन (द) फलात्

(ii) 'राम' शब्दस्य तृतीया विभक्तेः एकवचनं भविष्यति –
(अ) रामेण (ब) रामाय
(स) रामे (द) रामयोः

(iii) 'बालकैः' पदे विभक्तिः अस्ति –
(अ) द्वितीया (ब) तृतीया
(स) पंचमी (द) षष्ठी

(iv) "कृषकः ग्रामं प्रति गच्छति" इत्यस्मिन् वाक्ये अव्ययपदम् अस्ति –
(अ) कृषकः (ब) ग्रामं
(स) प्रति (द) गच्छति

(v) अधोलिखितेषु अव्ययपदम् अस्ति –
(अ) गच्छति (ब) मोहनः
(स) लता (द) अत्र

(vi) अधोलिखितेषु अव्ययपदं न अस्ति –
(अ) तत्र (ब) कुत्र
(स) सीता (द) यत्र



https://www.mpboardonline.com

प्र.2 कोष्ठके प्रदत्त शब्देषु रिक्तस्थानपूर्तिं कुरुत – (1X6=6)

(i) "पठन्ति" इत्यस्मिन् पदे ........................ धातुः अस्ति।

(पठ् / पठत्)

(ii) 'गच्छामि' इत्यस्मिन् पदे ........................ लकारः अस्ति।

(लट् / लृट् / लङ्)

(iii) लोट्लकारस्य उदाहरणं........................ अस्ति।

(वदतु / पठति)

(iv) 'धावामि' पदे ........................ वचनम् अस्ति।

(एकवचनं / द्विवचनं)

(v) 'प्राचार्यः' इत्यस्मिन् पदे ........................ उपसर्गः अस्ति।

(प्राच् / प्र)

(vi) 'अति' उपसर्गस्य उदाहरणम् ........................ अस्ति।

(अधिकः / अत्यधिकः)

प्र.3 उचित युग्ममेलनं कुरुत – (1X6=6)

| (अ) | (ब) |
|---|---|
| (i) नीलं यत् कमलम् | (क) माता च पिता च |
| (ii) पितरौ | (ख) कर्मधारय समासः |
| (iii) सत् + जनः | (ग) अव्ययीभावः |
| (iv) यथाशक्तिः | (घ) सज्जनः |
| (v) विद्यालयः | (ङ) रमेशः |
| (vi) रमा + ईशः | (च) दीर्घस्वर सन्धिः |



https://www.mpboardonline.com

प्र.4 एकपदेन उत्तरं लिखत – (1×6=6)

(i) 'पठितुम्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(ii) 'गच्छन्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति?

(iii) 'क्त' प्रत्ययस्य एकम् उदाहरणं लिखत।

(iv) सरसाः रसालाः कदा लसन्ति?

(v) माता काम् आदिशत्?

(vi) 'बालकस्य' इत्यस्य का विभक्तिः अस्ति?

प्र.5 शुद्ध वाक्यानां समक्षम् 'आम्' अशुद्ध वाक्यानां समक्ष 'न' इति लिखत – (1×6=6)

(i) 'पवनम्' इति पदस्य पर्यायपदं समीरम् अस्ति।

(ii) 'नदी' इत्यस्याः पर्यायपदं 'सरिता' अस्ति।

(iii) 'फलम्' इत्यस्य पर्यायपदं 'पत्रम्' अस्ति।

(iv) 'सुखम्' इत्यस्य विलोमपदं 'दुःखम्' अस्ति।

(v) 'रात्रिः' पदस्य विलोमपदं 'दिनम्' अस्ति।

(vi) 'प्रसन्नः' पदस्य विलोमपदं 'सुखम्' अस्ति।

प्र.6 कविः वाणीं किं कथयति? (2)

<u>अथवा</u>

बालिकया पूर्वं कीदृशः काकः न दृष्टः आसीत्?

प्र.7 बालिका किं दृष्ट्वा आश्चर्यचकिता जाता? (2)

<u>अथवा</u>

मासपर्यन्तं धेनोः अदोहनस्य किं कारणमासीत्?

प्र.8 कालः कस्य रसं पिबति? (2)

<u>अथवा</u>

मल्लिकया किं दृष्ट्वा धेनोः ताडनस्य वास्तविकं करणं ज्ञातम्?



https://www.mpboardonline.com

प्र.9 सज्जनानां मैत्री कीदृशी भवति? (2)

**अथवा**

यत्नेन किं रक्षेत् वित्तं वृत्तं वा?

प्र.10 कुत्र दरिद्रता न भवेत्? (2)

**अथवा**

निर्धनायाः दुहिता मञ्जूषायां कानि अपश्यत्?

प्र.11 रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत – (कोऽपि द्वे) (2)

(i) ग्रामे निर्धनास्त्री अवसत्।

(ii) मोदकानि पूजानिमित्तानि रचितानि आसन्।

(iii) स्वर्णकाकं निवारयन्ती बालिका प्रार्थयत्।

प्र.12 अधोलिखितानि वाक्यानि कः कं प्रति कथयति (कोऽपि द्वे) लिखत – (2)

(i) धन्यवाद मातुल! याम्यधुना।

(ii) पुत्रिके! नाहं पापकर्म करोमि।

(iii) त्रिसेटकमितं दुग्धम्। शोभनम्। व्यवस्था भविष्यति।

प्र.13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत। (2×2=4)

प्र.14 अधोलिखितेषु अशुद्धवाक्येषु द्वयः वाक्यं शुद्धिं कुरुत – (2)

(i) छात्रः विद्यालयं गच्छन्ति।

(ii) वृक्षात् पत्राणि पतति।

(iii) सः फलं खादन्ति।



https://www.mpboardonline.com

प्र.15 प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत – (कानपि चत्वारः) (½ ×4=2)

(लोभं, मञ्जूषां, महोत्सवः, पूजनं, पलायनः)

(i) लोभाविष्टा सा वृहत्तमां .................... गृहीतवती।

(ii) तदनन्तरं सा .................... पर्यत्यजत्।

(iii) शीघ्रमेव .................... सम्पादय।

(iv) शिवास्ते सन्तु ....................।

(v) मासानन्तरम् अस्मत् गृहे .................... भविष्यति।

प्र.16 प्रदत्तवाक्यैः कथाक्रम संयोजनं कुरुत – (½ ×4=2)

(i) मल्लिका पूजार्थं मोदकानि रचयति।

(ii) चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति।

(iii) चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मासपर्यन्तं दोहनं न करोति।

(iv) क्षमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये नन्दनं सूचयति।

प्र.17 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – (3)

पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्। "सूर्यातपे तण्डुलान् खगेभ्यो रक्ष"। किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्।

(i) दुहिता कीदृशी आसीत्?

(ii) माता पुत्रीं किम् आदिशत्?

(iii) कः समुड्डीय बालिकायाः समीपम् अगच्छत्?



https://www.mpboardonline.com

<u>अथवा</u>

तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत्। तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यं ज्ञातवती। सूर्यातपे तण्डुलान् निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत्।

(i) तस्मिन् ग्रामे एका अपरा का न्यवसत?

(ii) पुत्री कस्य रहस्यं ज्ञातवती?

(iii) स्वसुतां रक्षार्थं कया नियुक्ता?

प्र.18 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – (3)

निनादय नवीनामये वाणि! वीणाम्
मृदुं गाय गीतिं ललित–नीति–लीनाम्।
मधुर–मञ्जरी–पिञ्जरी–भूत–मालाः
वसन्ते लसन्तीह सरसा रसालाः
कलापाः ललित–कोकिला–काकलीनाम्।।

(i) कविः वाणीं कां वादयितुं प्रार्थयति?

(ii) कीदृशीं वीणां निनादयितुं कविः प्रार्थयति?

(iii) केषां कलापाः विलसन्ति?

<u>अथवा</u>

गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः।

(i) गुणाः केषु गुणाः भवन्ति?

(ii) नद्यः कीदृशाः तोयाः प्रवहन्ति?

(iii) समुद्रमासाद्य नद्यः कीदृशाः भवन्ति?



https://www.mpboardonline.com

प्र.19 अधोलिखितं नाट्यांशं पठित्वा त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (3)

चन्दनः – मल्लिके! तव यात्रा तु सम्यक् सफला जाता? काशीविश्वनाथस्य कृपया प्रियं निवेदयामि।

मल्लिका – (साश्यर्चम्) एवम्। धर्मयात्रातिरिक्तं प्रियतरं किम्?

चन्दनः – ग्रामप्रमुखस्य गृहे मासान्ते महोत्सवः भविष्यति। तत्र त्रिशत–सेटकमितं दुग्धम् अस्माभिः दातव्यम् अस्ति।

मल्लिका – किन्तु एतावन्मात्रं दुग्धं कुतः प्राप्स्यामः?

(i) कस्य कृपया प्रियं निवेदयामि?

(ii) माल्लिका साश्यर्चं किम् अवदत्?

(iii) मासान्ते महोत्सवः कुत्र भविष्यति?

(iv) कति दुग्धं दातव्यम्?

प्र.20 अधोलिखितम् अपठितगद्यांशं सम्यक् पठित्वा चतुराणां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (4)

गोदावरीतीरे विशालः शाल्मलीतरुः आसीत्। तत्र पक्षिणः निवसन्ति स्म। अथ कदाचित् रात्रौ कश्चिद् व्याधः तत्र तण्डुलान् विकीर्य जालं च विस्तीर्य प्रच्छन्नो भूत्वा स्थितश्च। प्रातःकाले चित्रग्रीवनामा कपोतराजः सपरिवारः आकाशे तान् तण्डुलकणान् अपश्यत्। ततः कपोतराजः तण्डुललुब्धान् कपोतान् प्रत्याह, "कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः। भद्रमिदं न पश्यामि। संभवतः कोऽपि व्याधः अत्र भवेत्। सर्वथा अविचारितं कर्म न कर्तव्यम्।

(i) शाल्मलीतरुः कुत्र आसीत्?

(ii) व्याधः कान् विकीर्य प्रच्छन्नो भूत्वा स्थितः?

(iii) सर्वथा कीदृशं कर्म न कर्त्तव्यम्?

(iv) कपोतराजः कान् प्रत्याहः?

(v) कपोतराजस्य नाम किम्?



https://www.mpboardonline.com

प्र.21 स्वस्य प्राचार्यस्य कृते अवकाशप्रार्थनापत्रं संस्कृत लिखत। (4)

**अथवा**

स्वमित्रं प्रति एकं पत्रं संस्कृते लिखत।

प्र.22 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायां दशवाक्येषु निबंधं लिखत – (4)

(i) संस्कृतभाषायाः महत्वं

(ii) कालिदासः

(iii) दीपावली

(iv) परोपकारः

---



https://www.mpboardonline.com